
## श्रीमारुतीस्तोत्रम्



ॐ नमो वायुपुत्राय भीमरूपाय धीमते।
नमस्ते रामदूताय कामरूपाय श्रीमते ।।१।।

मोहशोकविनाशाय सीताशोकविनाशिने ।
भग्नाऽशोकवनायास्तु दग्धलंकाय वाग्मिने ॥२॥

गतिनिर्जितवाताय लक्ष्मणप्राणदाय च ।
वनौकसां वरिष्ठाय वशिने वनवासिने ॥३॥

तत्त्वज्ञानसुधासिंधुनिमग्नाय महीयसे ।
आंजनेयाय शूराय सुग्रीवसचिवाय ते ॥४॥

जन्ममृत्यूभयघ्नाय सर्वक्लेशहराय च।
नेदिष्ठाय प्रेतभूतपिशाचभयहारिणे ।। ५ ।।

यातनानाशनायास्तु नमो मर्कटरूपिणे ।
यक्षराक्षसशार्दूलसर्पवृश्चिकभीहृते ।।६।।

महाबलाय वीराय चिरंजीविन उद्धते ।
हारिणे वज्रदेहाय चोल्लंघितमहाब्धये ।।७।।

SREEGURU DATTA PRASANNOSTHU
Sree Datta Vaibhavam
A Path For Spiritualistic & Materialistic Development

बलिनामगण्याय नमो नः पाहि मारुते ।
लाभदोऽसि त्वमेवाशुहनुमन् राक्षसान्तक ।।८।।

यशो जयं च मे देहि शत्रून्नाशय नाशय
स्वाश्रितानामभयदं स एवं स्तौति मारुतिम् ।
हानिः कुतो भवेत्तस्य सर्वत्र विजयी भवेत् ॥ ९ ॥

इति श्री.प.प. श्रीवासुदेवानंदसरस्वतीविरचितं श्रीमारुतिस्तोत्रं संपूर्णम् ।

SREEGURU DATTA PRASANNOSTHU
Sree Datta Vaibhavam
A Path For Spiritualistic & Materialistic Development